योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११४

अज्ञातलेखकः

चतुर्दशाधिकशततमः सर्गः ११४

श्रीवसिष्ठ उवाच ।

अथ तेषां तदा तत्र ततस्तांस्तानदर्शयन् ।

पार्श्वगा वनवृक्षाब्धिशैलमेघवनेचरान् ।। १

देव पश्यास्य शैलस्य येयमभ्रंकषाग्रभूः ।

समरुन्मध्यदेशादेरश्मदेशमुपेयुषः ।। २

इमा बकुलपुन्नागनालिकेरकुलाकुलाः ।

विपिनावलयो वान्तविविधामोदमारुताः ।। ३

लुनात्युपत्यकां वार्धिः शैलशालिशिलावलीः ।

वनालीर्लहरीदात्रैरापादफलपल्लवाः ।। ४

अधित्यकासु मेघालीर्नृत्यतां स्वाम्बुभूभृताम् ।

धुनोति जलधिर्बालो गृहधूमावलीमिव ।। ५

राकाब्धिपूरसंप्रोतशङ्खशाखास्तटद्रुमाः ।

चन्द्रबिम्बफलाः कल्पवृक्षा इव विभान्त्यमी ।। ६

रत्नपुष्पभरापूर्णरक्तपल्लवपाणयः ।

भवन्तं पूजयन्तीव लतादारान्विता द्रुमाः ।। ७

प्रोतोर्मिमकरग्रासैर्दृषद्दन्तैरागुहामुखैः ।

ऋक्षवानृक्षवद्भूभृद्धत्ते घुरघुरारवम् ।। ८

महेन्द्रो मन्द्रगर्जाभिरभिक्षिपति गर्जतः ।

पर्जन्यानूर्जितो जन्यः प्रतिजन्यान्यथा जडैः ।। ९
चन्दनारूषितः श्रीमाञ्जेतुं जलधिवेल्लनाः ।
समुद्यत इवोच्चोऽसौ मल्लो मलयपर्वतः ।। १०
सर्वतः कचितोऽजस्रं रत्नवीचिभिरम्बुधिः ।
भूरत्नवलयभ्रान्त्या प्रेक्ष्यते सूर्यमार्गगैः ।। ११
सरन्ति रत्नमूर्धानश्चलकानिलपायिनः ।
वानपूराः पर्वतकाः सर्पा इव नतोन्नतैः ।। १२
भ्रमन्तो वीचिशृङ्गेषु मकरेभाः करोत्कटैः ।
हरन्ति सीकराम्भोदा मेघानुद्राविता इव ।। १३
आवर्तवलिताकारः सीकरोत्करकीर्णदिक् ।
पूर्णत्वात्तु शिरोऽशक्तो म्रियतेऽत्युत्करः करी ।। १४
विविधप्राणिसंपूर्णाः सजलाद्रिनतोन्नताः ।
यथैवाम्भोधयः सर्वास्तथैव द्वीपभूमयः ।। १५
आवर्तानात्मनोऽनन्यानप्यन्यानिव भास्वरान् ।
गृह्यमाणानसद्रूपान्दृश्यमानानपि स्फुटान् ।। १६
तरङ्गतरलानन्तर्जडानप्यम्बुधिश्चलान् ।
धत्ते ब्रह्मजगन्तीव सान्तानप्यन्तवर्जितान् ।। १७
यानन्तरिन्द्रवद्धानुमणीन्धत्तेऽम्बुधिर्बहून् ।
मन्थापहृतसर्वस्वो देवेभ्यः परिरक्षितान् ।। १८
दृश्यमानान्महातेजस्तथा पातालतोऽप्यलम् ।
प्रतिबिम्बविभंग्यान्तरसत्यानिव गोपितान् ।। १९
तेषां मध्यादेकमेकं प्रत्यहं पश्चिमार्णवे ।
निक्षेपाय क्षिपति यं तेन मन्ये दिनं भवेत् ।। २०
नानादिग्देशपयसामब्धौ साधुसमागमः ।
यात्रायामिव लोकानां मिथः कलकलान्वितः ।। २१
जलेचरावरा नूनं सागरार्णवसंगमे ।

अन्योन्यवेल्लनाद्युद्धं न कदाचन शाम्यति ।। २२

ताम्यत्तिमितरङ्गाग्रनर्तनावर्तविभ्रमम् ।

वलयन्वायुरायाति वान्तसीकरमौक्तिकैः ।। २३

सरिन्मुक्तालतामध्यमध्यस्थाब्दमणीश्वराः ।

दीर्घाः खणखणायन्ते चञ्चलाः सर्वतोऽम्बुधेः ।। २४

महेन्द्राद्रेर्गुहागेहपरावृत्तार्णवाध्वनाम् ।

भांकारिण्यो भुवः सिद्धसाध्यानां सुसुखावहः ।। २५

मन्दरः कन्दरोद्गीर्णैः प्रसरैर्मातरिश्वनः ।

कम्पाकुलवनाभोगः पुष्पमेघांस्तनोति खे ।। २६

चूतनीपकदम्बाढ्यगन्धमादनकन्दरान् ।

विशन्ति मेघहरिणास्तडित्तरललोचनाः ।। २७

हिमवत्कन्दरोद्गीर्णा वल्लीवलयताण्डवम् ।

तन्वाना वायवो यान्ति विभिन्नाब्दाब्धिवीचयः ।। २८

तात चूतकदम्बाग्रपरामर्शसुगन्धयः ।

वलयन्त्यब्धिकल्लोलान्गन्धमादनवायवः ।। २९

जलदान्वलयन्वायुरलकालकतां गतान् ।

इत आयाति पुष्पाभ्रं रचयन्वनवीथिषु ।। ३०

कुन्दमन्दारसंदोहमधुरामोदमन्थरान् ।

तुषारसीकरोन्मिश्रानिवात्र कलयानिलान् ।। ३१

नालिकेरलतालास्यलब्धतिक्तसुगन्धयः ।

पतन्ति पवनाः पश्य पारसीकपुरीः पुरा ।। ३२

धुन्वानाः पुष्पितेशानवनकर्पूरवारिदान्।

चालयन्तोऽनिला वान्ति कैलासकमलाकरान् ।। ३३

करीन्द्रकुम्भनिष्क्रान्तमदमन्थरमूर्तयः ।

इमे शुकशुकायन्ते विन्ध्यकन्दरवायवः ।। ३४

शबरीणां शरीरेषु शीर्णपर्णोत्करे गिरौ ।

नाराचैः पर्णशबरैर्वनाली नगरायते ।। ३५

अब्ध्यद्रिसरिदम्भोदवनलेखाङ्किका दिशः ।

त्वत्प्रतापबलैरेता हसन्तीवार्करश्मिभिः ।। ३६

अत्रोपशैलवनवीथिषु पुष्पशय्या

विद्याधरीविरचिताः परिवर्णयन्ति ।

पार्श्वद्वयस्थपरिवृत्तपदात्समुद्रा-

द्व्यावृत्तमुग्धवनितापुरुषायितानि ।। ३७

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० उ० अवि० विप० दिग्दर्शनं नाम चतुर्दशाधिकशततमः सर्गः ।।

११४ ।।